International Journal for Multidisciplinary Research
International Conference on Multidisciplinary Research & Studies 2023
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# मृच्छकटिके वर्णितं मानवता धर्मस्योपादेयता

**प्रा.डॉ मंजुश्री श्रीपाद नेव्हल**

संस्कृत प्राध्यापक ,बाबाजी दाते कला आणि वाणिज्य महाविद्यालय, यवतमाळ

**सारांश:**

शुद्रकप्रकरणमिति नाम्ना मृच्छकटिकं महत्त प्रसिद्धं रूपकमस्ति । मृच्छकटिकस्य कथा रामायणमहाभारतेतिहासादी कथानकात् भिन्ना वर्तते । मृच्छकटिकस्य पात्राणि सामान्यजीवने आधुनिकिकाले यथा दृश्यते तथैव तानि सन्ति । अस्मिन् कथानके भवतु उत् पात्रेषु भवतु सर्वत्र मानवताधर्मः कथं दृश्यते तस्याभ्यासोऽस्मिन् शोधनिबंधे वर्णितमस्ति । धर्म शब्दस्यार्थः यद् धारयते सः धर्मः । किं धारयामः चेत् यत् सत्यं सुन्दरं मङ्गलमयमस्ति तदैव धारयामः इति इतिहादी धर्मग्रन्थस्य शिक्षा वर्तते । तस्यैव शोधात्मकबोधः समाजेषु आधुनिकिकाले महत्त्वपूर्णम् ।

**प्रस्तावना :-**

संस्कृत साहित्ये रूपकानां राशी अस्ति । बहवः कवयः सन्ति । तासु शूद्रक: नाम्ना रचनाकारेण रचितमिदं शूद्रकप्रकरणं मृच्छकटिकमिति नाम्ना सुविख्यातमस्ति । अस्मिन् रूपकस्य कथानकं भवतु वा शूद्रकस्य वर्णनं सर्वसामान्यमस्ति । शूद्रकस्य एतदेकमेव रूपकम् ।

**उद्दिष्टम् :-**

- अस्मिन् कथानके समाजाय किमुपयुक्तम् दृश्यते तस्य शोध:
- पात्रेषु आचरणात्मकं सूक्ति भवतु वा व्यवहार: तस्य बोधात्मकम् शोध :

**व्याप्ति एवं मर्यादा :-**

रूपकेषु नाटकात्मकं दश भेदाः सन्ति । तासु केवलं शूद्रक विरचितं मृच्छकटिकस्याभ्यासोऽत्रास्ति |

**पद्धती :-**

प्रस्तुतशोधनिबन्धाय विश्लेषणात्मकं संशोधनपद्धती: आचरिता ।

**पुटशब्दाः :-**

मृच्छकटिकम्, प्रकरणम्, शूद्रक, वसन्तसेना, वासवदत्ता, मानवताधर्म:, गणिका

**मानवता शब्दस्य अर्थः :-**

मैत्रायणी शाखायां षड्भेदेषु मानवेति प्रभेद: उल्लिखितम् ।[१] मत्स्यपुराणेषु मानवाय पंचार्षेय इत्युक्तम् । मानव शब्दस्य निर्वचनं महात्मा श्रीविद्या प्रकाशानन्दस्वामी: करोति -
" मानव शब्द में 'मा' का अर्थ 'अज्ञान' या 'अविद्या' और 'न' अक्षरका अर्थ है 'बिना' एवं 'व' अक्षरका अर्थ 'वर्तन करो या बर्ताव करो ।' मानव शब्दका भाव यह हुआ कि अज्ञान या अविद्यारूपी मायाको हटाकर आत्मसाक्षात्कार के द्वारा परमेश्वरका सामीप्य प्राप्त करनेवाला ही 'मानव' कहलाने योग्य है।"[२] धर्मलक्षणानि यः पालयति सैव मानव: । मानवः एव धर्माणां पालनं कर्तुं शक्नोति न तु अन्ये | अतो मानवता धर्मस्य पालनं तु समाजाय हितकारं बलवर्धकं शाक्तिप्रदायकं च वर्तते | मम व्यवहारेणापराः दुःखिताः न भवेयु: एवं तथा न वर्तितव्यं तदैव मानवताधर्म: । अतो कथ्यते 'आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।'

**शूद्रकस्य परिचय: :-**

मृच्छकटिकमिति शूद्रकस्य प्रसिद्धा रचना । तस्यानुवाद: मराठीभाषायामपि दृश्यते । तस्य प्रयोग: सह्याद्रिवाहिनी इति मराठी वाहिन्याम् दूरदर्शने बहुवारं प्रकाशितं भवति ।

संस्कृत नाटके मुख्यतया एवं दृश्यते यद् तस्य रचनाकार: स्वस्य विषये बहु अधिकं वा स्वल्पमपि न लिखति । तथैव परिस्थिती मृच्छकटिकरूपकेष्वप्यस्ति । प्रकरणस्य प्रथमाङ्के स्वल्पमेव परिचयः तेन दत्तः ।

ऋग्वेदं सामवेदं गणितमय कलां वैशिकीं हस्तिशिक्षां ।

ज्ञात्वा शर्वप्रसादाद् व्यपगततिमिरे चक्षुषी चोपलक्ष्य ।।
श्राजानं वीक्ष्य पुत्रं परम समुदयेनाश्वमेधेन चेष्ट्वा ।
लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोग्निं प्रविष्टः ।।[३]

शुद्रक: ऋग्वेद सामवेद गणितशास्त्रं चतुषष्टिकला नाट्यशास्त्रं हस्तीसञ्चालनम् च एतादृशाः शास्त्राणां ज्ञाता आसीत् । भगवत: शङ्करस्य कृपाप्रसादेन अंधःकाररहितं ज्ञानचक्षुषा स्वबालकाय भूपतिः कृत्वा सिंहासने प्रतिष्ठापितम् । अश्वमेधयज्ञस्य प्रवक्ता एवं दशाधिकशतवर्षस्यायु: तेन सम्पन्नतया स्वाथ्यदायकं यापितम् । अग्निहोत्रानुष्ठाने नित्यतासीत् । बहुषु विषयेषु सः ज्ञाता आसीत् ।

**मृच्छकटिकम् विषये:-**

शूद्रकस्य एषा एकमेव रचना । मृच्छकटिकस्य कथा द्वयो: भागयो: विभाजितास्ति ।

१. चारूदत्ता एवं वसन्तसेनाया: प्रेम: ।
२. आर्यकाय राज्यस्य प्राप्ती ।

रूपकेषु दश भेदा: सन्ति तेषु नाटकादनन्तरं प्रकरणस्य महत्त्वपूर्णं स्थानमस्ति । प्रकरणस्य लक्षणं साहित्यकार: कथयति -

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।।
शृङ्गारीऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सपायधर्मकामार्थपरो धीरप्रशान्तकः ॥
नायिका कलुजा क्वापि वेश्या क्वापि द्वयं क्यचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेद स्तृतीयक: ।
कितविद्युतकारादि-वेट-चेटक - सङ्कुल: ।।[४]

प्रकरणस्य कथानकं लौकिकं कविकल्पितञ्च भवति । मुख्यरसः शृङ्गारः एवञ्च ब्राह्मणामात्य वा वणिकेतेषु कोऽपि नायक: भवति । एष: नायक: धीरप्रशान्त: धर्मार्थकामेषु: पुरुषार्थपरायणः वर्तते । प्रकरणस्य नायिका कुलस्त्री वा वेश्या भवति । कुत्रचित् द्वे अपि भेदात्मिका स्त्री वर्तते । धूर्तविट चेट च विद्यते । नाटकस्य परिवर्तितरूपमेव प्रकरणम् ।

मृच्छकटिकम् प्रकरणस्य कथानकं लोकाश्रितं किन्तु कविकल्पितमस्ति । नायकः चारुदत्त: ब्राह्मण: निर्धन: पुरुषार्थसिध्दयर्थं तत्पर: भवति । वेश्या वसन्तसेना वा कुलस्त्री धर्मपत्नीरूपा धूता एते द्वे स्त्रीपात्रे स्तः । अत: मृच्छकटिकं नाटकन्न तु प्रकरणङ्कथ्यते ।

नायकनायिकायो: नाम्ना रचनायाः नामाङ्कणं बहुवारं भवति किन्तु मृच्छकटिकं तथा नास्ति । मृच्छकटिकस्य षष्टमे अङ्के घटीता कथा महत्त्वपूर्णमस्ति । सा घटना स्वीकृत्य एतस्य नामाङ्कनं कृतम् । चारुदत्तस्य पुत्रः सुवर्ण शकटिकायाः कृते रोदिति । रदनिका तं वसन्तसेनायाः समीपं नयति । वसन्तसेना तस्य रोदनस्य कारणं ज्ञात्वा प्रेमार्देन तस्यै अलङ्कारै: विभूषितं शकटिकारूपं क्रीडनकं ददाति । मृच्छकटिकम् 'मृत् + शकटिका' इति शब्देन निर्मितं शब्दम् अस्ति ।

**मानवताया: विचारा: :-**

प्रकरणम् इदं कथानकस्य घटनाक्रमेण प्रभावशाल्यस्ति । प्रकरणस्यान्तः सुखान्तोऽस्ति । कर्णपूरक: यदा मदोन्मत्तगजं ताडयति तदा तस्य पराक्रमेण प्रसन्नो भूत्वा चारुदत्तोऽङ्गुलिका नास्ति अत: द्विपटी ददाति ।[५] कर्णपुरके प्रसङ्गे प्रसन्ना भूत्वा वसन्तसेनाभूषणानि ददाति । चारुदत्तः हर्षस्य वृत्तं उक्तं चेटाय द्विपटी प्रदत्तकाले वदति -

'भद्र ! न कदापि प्रियवचनं निष्फलीकृतम्, तद् गृह्यतां पारितोषिकम् ।'[६]

प्रदानकाले चारूदत्त: गर्विभूतः न दृश्यते । अहं ददामि इति भावः तस्य मुखे नास्ति । परोपकारे उपकारस्य लेशः न तु साधूभाव: प्रवहति । सरल सत्कार्यस्य भावः पात्राणां वचांसि कर्मसु प्रेक्षकाय रचनाकारेण निर्मित:।

चारुदत्तः निर्धन: लोभहीन: चास्तीति तर्क: कुतर्क: न । किन्तु वसन्तसेना ऐश्वर्यशालिनी तस्याः व्यवसायोऽपि गणिकाया: किन्तु सापि धनार्थमेतादृशं कार्यमुदरभराणाय कुर्वन्ती । वसन्तसेना यदि शकारस्य समीपं गमिष्यति तर्ही तस्याः जनन्यैः दशसहस्त्राधिक मुद्रां मेलिष्यति किन्तु सा एतादृशस्य लाभस्यास्वीकारः कुर्वन्ती भाषते -

'यदि मां जीवन्तीमिच्छसि, तदा एवं न पुनरहं मात्रा आज्ञापयितव्या ।'[७]

चारुदत्तः प्रकरणस्यारंभे धर्मकर्में निरतः दृश्यते । देवदेवतानां पूजा बलिप्रदानस्य महत्वपूर्णकार्यं महत्वपूर्णं कर्तव्यं मन्यते । विदुषकरूपी तस्य मित्रमपि धर्मस्याचरणे परिहासः करोति । तं चारुदत्तं प्रत्युत्तरति -

'वयस्य मा भैषम् ! गृहस्थस्य नित्योऽयं विधिः ।'[८] चारुदत्तस्य विचारे - देवपूजादी धार्मिक आचरणविषये अनपेक्षिततर्कं नोचितं तद् तु नित्यकर्तव्यमेव ।

तपसा मनमा वाग्भिः पूजिमा बलिकर्मभिः ।
तुष्यन्ति शमिनां नित्यं देवता: किं विचारितैः ।।[९]

वासवदत्ता धर्माचरणे पूर्णतया विश्वसति । मृत्यूदण्डसमये अपि तस्य धर्मे विश्वास: न न्यूना भवति ।

प्रभवति यदि धुर्मो दूषितस्यापि मेऽद्य ।
प्रबल पुरुषवाक्यैर्भाग्यदोषात् क्वचित् ।।
सूरपतिभवनस्था यत्र तत्र स्थिता वा ।
व्यपनयतु कलङ्कं स्वस्वभावेन सैव॥[१०]

अत्र चारुदत्तं पूजा कर्मस्याधारेण पालितधर्मेण विना तेन वसन्तसेनया सहाचरितं मानवतेषु अधिकतरं विश्वासोऽस्ति । चारूदत्तवसनसेनायो: प्रेम: व्यावहारिक: नास्ति । ते मानवताया: परस्परं मानवरुपी आचरणेन अबध्नीताम् । तयो: आचरणे कुत्रापि कुविचारः व्यभिचारश्च नासीत् । तु द्वयो: समाजेषु आचरणं मानवतानुसारमासीत् ।

वसन्तसेनायाः अलङ्कारस्य चौर्यं भवति तदा विदूषकोऽसत्यं जल्पति तदा चारूदत्तः वदति -

भैक्ष्येणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम् ।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम् ॥[११]

चारूदत्ताय सच्चरित्रं महत्त्वपूर्णमस्ति । अतः चरित्ररक्षणायानूचितता नैव स्वीकरोति । कमपि दुःख भवेतेतादृशाचरणमपि सः नैव करोति । वसन्तसेनायाः अलङ्कारस्य लुण्ठनं भवति तदा सः स्वयमेव द्युतक्रिडायां पराजितो भवतिति सूचयति | अलङ्कारस्य स्थाने बहुमुल्यरत्नावली तस्याः कृते प्रेषयति । तस्य सत्यता ज्ञात्वा वसन्तसेना रत्नावली न स्वीकरिष्यति एवञ्च निर्धनताया: कारणेन समाजस्यापि विश्वास: न भविष्यति । अत: तेनानुप्रयोग: कृत: । 'शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता ।'[१२]

चारुदत्त: आदर्शप्रियकरोऽस्ति । स: श्रेष्ठतमायां परम् सुन्दर्यां गणिकायां स्निह्यति । गणिकाया: विचारं ज्ञात्वा एव सः स्वस्नेह: प्रकटयति । स्वस्य सामर्थ्यं नास्तीति ज्ञात्वा चारूदत: प्रेमवचनानि स्वसमीपमेव स्थापयति ।

यया मे जनित: काम क्षीणे विभवविस्तरे ।
क्रोध: कुपुरुषस्येव स्वगात्रेष्वेव सीदति ॥[१३]

अनुचित व्यवहारेण वा मानवतायाः परित्यागेन चारुदत्तः वसनासेनया सह न कदापि व्यवहरति । 'प्रेमाय किमपि' इति तस्य वा तस्याः अपि आचरणं कुत्रापि शूद्रकेन न चित्रितम् । वसक्तसेनादृशा गणिकायाः उपरि चारुदस्य प्रेमभावोऽस्ति किन्तु सः स्त्रीलम्पट नास्ति । भ्रमवशेन रदनिकां मत्वा चारूदत्तः द्विपटं क्षिपति तदा अपरा स्त्रि इति ज्ञात्वा सः अनुशयति ।

'न युक्तं परकलत्रदर्शनम् ।'[१४]

यदा वसन्तसेनाया: वधस्यापराध: चारुदस्तस्योपरि आरोपितं भवति तदा त्वं सः मृत्योः न बिभेति । मानवतारूपेणाचरणे कलङ्कः मा भवेतिति विचारेण सः दुःखितः भूत्वा भाषते -

न भीतो मरणादस्मि केवलं दूषितं यशः ।
विशुद्धस्य हि मृत्युः पुत्र जन्मसमो भवेत् ॥[१५]

चारूदत्त: निर्धनः अस्ति । सः पूर्व धनिक: आसित् निर्धनतायाः कारणं योग्याचरणमेव । निर्धनत्वेन तं परिचिताः त्यक्तवन्ता: ।

यदा तु भाग्यक्षयपीडितां दशां नरः कृतान्तोपहितां प्रपद्यते ।
तदाऽस्य मित्राण्यपि यान्त्यमित्रतां चिरानुरक्तोऽपि विरज्यते जनः ॥[१६]

एतादृशी वास्तवता चारुदत्तेन प्रथमाङ्के स्ववचनेन कथिता । तं प्रत्यक्षजीवनस्य एष: अनुभवः। किन्तु कुत्रापि प्रकरणस्यान्तिमाङ्कं पर्यन्तं तेन मानवता धर्मस्य त्यागः कृतवानिति न दृश्यते ।

वसन्तसेना गणिकास्ति किन्तु सापि जीवननिर्वाहे अपव्ययः कुर्वन्ती न दृश्यते । धनलोलुपापि सा नास्ति । चारूदत्त: तु निर्धन: किन्तु तस्यापि अनुरागी अस्ति । कारणम् -

'दरिद्रपुरुशसंक्रान्तमनाः खलु गणिका लोकोऽवर्चनीया भवति ।'[१७]

वसन्तसेना सामाजिकतां प्रति सावधानमस्ति । चारुदत्तस्य गृहं प्रति सा विना कथनेन गच्छति अतो साक्षमां याचते ।

'एते नानुचिभूमिकारोहणेनापराद्धेऽर्थं शीर्षेण प्रणम्य प्रसादयामि ।'[१८]

International Journal for Multidisciplinary Research
International Conference on Multidisciplinary Research & Studies 2023
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

यदा चारुदत्तोऽलङ्काराणां परिवर्तनरूपेण धूतायाः रत्नावलीं प्रेषयति तदा वसन्तसेना सा स्वीकरोति । चारूदत्तोऽनुचित: विचारः न कुर्युः इति तस्य केवल कारणेन । अत्र चारुदत्तस्य मनस: विचार: तया कृत: । धूतां प्रति सम्मानं प्रकटयितुं स्वयमेव तां मेलितुं तस्याः गृहे तिष्ठति । धूतां कथयति -

'चेटि ! गृहाणैतां रत्नावली मम भागिन्या आर्यं धूतायै गत्वा समर्पय । वक्तव्यं च ---- अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी तदा युष्माकमपि | तदेषां तवैव कण्ठाभरणं भवतु ।'[१९]

येन धूतां प्रति तस्या: सम्मानभावना वर्धिता मानवतायाः कृते योग्य नम्रतापि दर्शकात् न तिरोभवति ।

**निष्कर्ष: :-**

- मृच्छकटिकप्रकरणस्य पात्रा: सर्वसामान्याः ।
- चारुदस्य जीवनन्निर्धनं किन्तु मानवताया: धनरुपाचरणे सोऽत्युच्चस्थाने प्रतिष्ठितोऽस्ति ।
- वसन्तसेना गणिका किन्तु धनलालसा स्वल्पमपि नास्ति ।
- विदूषक: भोजने लोलुपः किन्तु निर्धनमित्रस्य त्यागः तेन न कृत: ।
- प्रकरणे सर्वग मानवताया: चित्रणं दृश्यते |

**सन्दर्भसूची :-**

१. भारतीय संस्कृती कोष खण्ड ७ पान क्र. ३२३
२. कल्याण धर्माङ्क पान क्र.१०२
३. मृच्छकटिकम् अंक १ श्लोक ४ पान क्र.१०
४. साहित्यदर्पण ६/२४१-२४३
५. मृच्छकटिकम् अंक २ पान क्र१७८-१७९
६. मृच्छकटिकम् पान क्र ३१८
७. तत्रैव पान क्र. २३५
८. तत्रैव पान क्र. ५२
९. तत्रैव अंक १ श्लोक १६ पान क्र.५३
१०. तत्रैव अंक १० श्लोक ३४ पान क्र.६११
११. तत्रैव अंक ३ श्लोक २६ पान क्र.२२३
१२. तत्रैव अंक ३ श्लोक २४ पान क्र.२२१
१३. तत्रैव अंक १ श्लोक ५५ पान क्र. ११८
१४. तत्रैव पान क्र. ११८
१५. तत्रैव अंक १० श्लोक २७ पान क्र.५९८
१६. तत्रैव अंक ०१ श्लोक ५३ पान क्र. ११६
१७. तत्रैव पान क्र.१३३
१८. तत्रैव पान क्र. १२१
१९. तत्रैव पान क्र. ३६९

**सन्दर्भग्रन्थसूची :-**

१. संपादक जोशी पं.महादेव शास्त्री, तृतीय आवृत्ती इ.स. १९९६, भारतीय संस्कृती कोष खण्ड ७ , प्रकाशन भारतीय संस्कृती कोश मंडळ, पुणे.
२. गीता गोरखपुर प्रेस सौर वर्ष २०२२ वर्ष ४० वे कल्याण धर्माङ्क
३. प्रा.त्रिपाठी जय शंकरलाल, चतुर्थ आवृत्ती सन् २००२मृच्छकटिकम् कृष्णदास अकादमी वाराणसी,
४. सत्यव्रत सिंह, १९५७, साहित्यदर्पण, चौखम्बा विद्या भवन वाराणसी